प्रश्न 1. उच्चारणं कुरुत–

(उच्चारण कीजिए—)

तरङ्गैः	मत्स्यजीविनः	विदेशिपर्यटकेभ्यः
सङ्गमः	तिसृषु	वैदेशिकव्यापाराय
प्रायद्वीपः	बङ्गोपसागरः	चन्द्रोदयः

उत्तरम्–[**नोट**–उपर्युक्त पदों का उच्चारण अपने अध्यापकजी की सहायता से स्वयं कीजिए–]

प्रश्न 2. अधोलिखितानां प्रश्नानाम् उत्तरं लिखत–

(निम्नलिखित प्रश्नों के उत्तरं लिखिए)–

(क) जनाः काभिः जलविहारं कुर्वन्ति?

उत्तरम्–जनाः नौकाभिः जलविहारं कुर्वन्ति।

(ख) भारतस्य दीर्घतमः समुद्रतटः कः?

उत्तरम्–भारतस्य दीर्घतमः समुद्रतटः मेरीनातटः।

(ग) जनाः कुत्र स्वैरं विहरन्ति?

उत्तरम्–जनाः जुहूतटे स्वैरं विहरन्ति

(घ) बालकाः बालुकाभिः किं रचयन्ति?

उत्तरम्–बालकाः बालुकाभिः बालुकागृहं रचयन्ति।

(ङ) कोच्चितटः केभ्यः ज्ञायते?

उत्तरम्–कोच्चितटः नारिकेलफलेभ्यः ज्ञायते।

प्रश्न 3. मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत–

(मंजूषा से पदों को चुनकर रिक्तस्थानों की पूर्ति कीजिए–)

बङ्गोपसागरः प्रायद्वीपः पर्यटनाय क्रीडा सङ्गमः

(क) कन्याकुमारीतटे त्रयाणां सागराणां ..... भवति।

(ख) भारतदेशः ..... इति कथ्यते।

(ग) जनाः समुद्रतटं ..... आगच्छन्ति।

(घ) बालेभ्यः ..... रोचते।

(ङ) भारतस्य पूर्वदिशायां ..... अस्ति।

उत्तराणि–(क) कन्याकुमारीतटे त्रयाणां सागराणां **सङ्गमः** भवति।

(ख) भारतदेशः '**प्रायद्वीपः**' इति कथ्यते।

(ग) जनाः समुद्रतटं **पर्यटनाय** आगच्छन्ति।

(घ) बालेभ्यः **क्रीडा**ः रोचते।

(ङ) भारतस्य पूर्वदिशायां **बङ्गोपसागरः** अस्ति।

प्रश्न 4. यथायोग्यं योजयत–

(यथायोग्य मेल कीजिए–)

समुद्रतटः	ज्ञानाय
क्रीडनकम्	पोषणाय
दुग्धम्	प्रकाशाय
दीपकः	पर्यटनाय
विद्या	खेलनाय

उत्तरम्–समुद्रतटः – पर्यटनाय।

क्रीडनकम् – खेलनाय।

दुग्धम् – पोषणाय।

दीपकः – प्रकाशाय।

विद्या – ज्ञानाय।

प्रश्न 5. तृतीयाविभक्तिप्रयोगेण रिक्तस्थानानि पूरयत–

(तृतीया विभक्ति के प्रयोग के द्वारा रिक्तस्थानों की पूर्ति कीजिए–)

यथा–व्योमः मित्रेण सह गच्छति। (मित्र)

(क) बालकाः ..... सह पठन्ति। (बालिका)

(ख) तडागः ..... विभाति। (कमल)

(ग) अहमपि ..... खेलामि। (कन्दुक)

(घ) अश्वाः ..... सह धावन्ति। (अश्व)

(ङ) मृगाः ..... सह चरन्ति। (मृग)

उत्तराणि–(क) बालकाः **बालिकाभिः** सह पठन्ति।

(ख) तडागः **कमलैः** विभाति।

(ग) अहमपि **कन्दुकेन** खेलामि।

(घ) अश्वाः **अश्वैः** सह धावन्ति।

(ङ) मृगाः **मृगैः** सह चरन्ति।

प्रश्न 6. अधोलिखितं वृत्तचित्रं पश्यत। उदाहरणानुसारेण कोष्ठकगतैः शब्दैः उचितवाक्यानि रचयत–

(नीचे लिखे वृत्तचित्र को देखो। उदाहरण के अनुसार कोष्ठक में दिए गए शब्दों के द्वारा उचित वाक्यों की रचना कीजिए।)



यथा–(1) रहीमः मित्रेण सह क्रीडति।

(2) ..... ।

(3) ..... ।

(4) ..... ।

(5) ..... ।

(6) ..... ।

(7) ..... ।

(8) ..... ।

उत्तरम्–(2) रहीमः द्विचक्रिकया आपणं गच्छति।

(3) रहीमः कलमेन पत्रं लिखति।

(4) रहीमः हस्तेन कन्दुकं क्षिपति।

(5) रहीमः नौकया जलविहारं करोति।

(6) रहीमः चषकेन जलं पिबति।

(7) रहीमः तूलिकया चित्रं रचयति।

(8) रहीमः वायुयानेन ह्यः आगच्छत्।

[**नोट**–यहाँ रेखांकित शब्दों में तृतीया विभक्ति का प्रयोग हुआ है।]

प्रश्न 7. कोष्ठकात् उचितपदप्रयोगेण रिक्तस्थानानि पूरयत–

(कोष्ठक से उचित पद के प्रयोग के द्वारा रिक्तस्थानों की पूर्ति कीजिए–)

(क) धनिकः ..... धनं ददाति। (निर्धनम्/निर्धनाय)

(ख) बालः ..... विद्यालयं गच्छति। (पठनाय/पठनेन)

(ग) सज्जनाः ..... जीवन्ति। (परोपकारम्/परोपकाराय)

(घ) प्रधानाचार्यः ..... पारितोषिकं यच्छति। (छात्राणाम्/छात्रेभ्यः)

(ङ) ..... नमः। (शिक्षकाय/शिक्षकम्)

उत्तरम्–(क) धनिकः **निर्धनाय** धनं ददाति।

(ख) बालः **पठनाय** विद्यालयं गच्छति।

(ग) सज्जनाः **परोपकाराय** जीवन्ति।

(घ) प्रधानाचार्यः **छात्रेभ्यः** पारितोषिकं यच्छति।

(ङ) **शिक्षकाय** नमः।

[**नोट**–इन वाक्यों में चतुर्थी विभक्ति का प्रयोग हुआ है।]